.. shrirudratrishati..

# ॥ श्रीरुद्रत्रिशति ॥

ॐ श्री गु॒रु॒भ्यो न॒मः । ह॒रिः ॐ ।

॥ श्रिरुद्रनाम त्रिशति ॥

नमो॒ हिर॑ण्यबाहवे॒ नम॑ः । सेना॒न्ये॑ नम॑ः ।
दिशां॒ च॒ पत॑ये॒ नम॑ः । नमो॑ वृ॒क्षेभ्यो॒ नम॑ः ।
हरि॑केशेभ्यो॒ नम॑ः । प॒शू॒नां पत॑ये॒ नम॑ः ।
नम॑ः स॒स्पिञ्ज॑राय॒ नम॑ः । त्विषी॑मते॒ नम॑ः ।
प॒थी॒नां पत॑ये॒ नम॑ः । नमो॑ बभ्लु॒शाय॒ नम॑ः ।
वि॒व्या॒धिने॒ नम॑ः । अन्ना॑नां पत॑ये॒ नम॑ः ।
नमो॒ हरि॑केशय॒ नम॑ः । उ॒प॒वी॒तिने॒ नम॑ः ।
पु॒ष्टानां॒ पत॑ये॒ नम॑ः । नमो॑ भ॒वस्य॑ हे॒त्यै नम॑ः ।
जग॑तां॒ पत॑ये॒ नम॑ः । नमो॑ रु॒द्राय॒ नम॑ः ।
आ॒त॒ता॒विने॒ नम॑ः । क्षेत्रा॑णां॒ पत॑ये॒ नम॑ः ।
नम॑ः सू॒ताय॒ नम॑ः । अह॑न्त्याय॒ नम॑ः ।
वना॑नां॒ पत॑ये॒ नम॑ः । नमो॒ रोहि॑ताय॒ नम॑ः ।
स्थ॒पत॑ये॒ नम॑ः । वृ॒क्षाणं॒ पत॑ये॒ नम॑ः ।
नमो॑ म॒न्त्रिणे॒ नम॑ः । वा॒णि॒जाय॒ नम॑ः ।
कक्षा॑णां॒ पत॑ये॒ नम॑ः । नमो॑ भु॒वं॒तये॒ नम॑ः ।
वा॒रि॒व॒स्कृ॒ताय॒ नम॑ः । ओष॑धीनां॒ पत॑ये॒ नम॑ः ।
नम॑ उ॒च्चैर्घो॑षाय॒ नम॑ः । आ॒क्र॒न्दय॑ते॒ नम॑ः ।
प॒त्तीना॒म् पत॑ये॒ नम॑ः । नम॑ः कृ॒त्स्नवी॒ताय॒ नम॑ः ।
धाव॑ते॒ नम॑ः । सत्त्व॑नां॒ पत॑ये॒ नम॑ः ॥

नम॒ः सह॑मानाय॒ नम॑ः । नि॒व्या॒धिने॒ नम॑ः ।
आ॒व्या॒धिनी॑नां॒ पत॑ये॒ नम॑ः । नम॑ः क॒कु॒भाय॒ नम॑ः ।
नि॒ष॒ङ्गिणे॒ नम॑ः । स्ते॒नानां॒ पत॑ये॒ नम॑ः ।
नमो॑ निष॒ङ्गिणे॒ नम॑ः । इ॒षु॒धि॒मते॒ नम॑ः ।
तस्क॑राणां॒ पत॑ये॒ नम॑ः । नमो॒ वञ्च॑ते॒ नम॑ः ।
प॒रि॒वञ्च॑ते॒ नम॑ः । स्ता॒यू॒नां पत॑ये॒ नम॑ः ।
नमो॑ नि॒चे॒रवे॒ नम॑ः । प॒रि॒च॒राय॒ नम॑ः ।
अर॑ण्यानां॒ पत॑ये॒ नम॑ः । नम॑ः सृका॒विभ्यो॒ नम॑ः ।
जिघा॑ꣳसद्भ्यो॒ नम॑ः । मु॒ष्ण॒तां पत॑ये॒ नम॑ः ।
नमो॑ऽसि॒मद्भ्यो॒ नम॑ः । नक्त॒ंचर॑द्भ्यो॒ नम॑ः ।

प्रकृन्तानां पतये नमः । नम उष्णीषिने नमः ।
गिरिचराय नमः । कुलुञ्चानां पतये नमः ।

नम इषुमद्भ्यो नमः । धन्वाविभ्यश्च नमः । वो नमः ।
नम आतन्वानेभ्यो नमः । प्रतिदधानेभ्यश्च नमः । वो नमः ।
नम आयच्छद्भ्यो नमः । विसृजद्भ्यश्च नमः । वो नमः ।
नमोऽस्यद्भ्यो नमः । विध्यद्भ्यश्च नमः । वो नमः ।
नम आसीनेभ्यो नमः । शयानेभ्यश्च नमः । वो नमः ।
नमः स्वपद्भ्यो नमः । जाग्रद्भ्यश्च नमः । वो नमः ।
नमस्तिष्ठद्भ्यो नमः । धावद्भ्यश्च नमः । वो नमः ।
नमस्सभाभ्यो नमः । सभापतिभ्यश्च नमः । वो नमः ।
नमो अश्वेभ्यो नमः । अश्वपतिभ्यश्च नमः । वो नमः ।

नम आव्यधिनीभ्यो नमः । विविध्यन्तीभ्यश्च नमः । वो नमः ।
नम उगणाभ्यो नमः । तृꣳहतीभ्यश्च नमः । वो नमः ।
नमो गृत्सेभ्यो नमः । गृत्सपतिभ्यश्च नमः । वो नमः ।
नमो व्रातेभ्यो नमः । व्रातपतिभ्यश्च नमः । वो नमः ।
नमो गणेभ्यो नमः । गणपतिभ्यश्च नमः । वो नमः ।

नमो विरूपेभ्यो नमः । विश्वरुपेभ्यश्च नमः । वो नमः ।
नमो महद्भ्यो नमः । क्षुल्लकेभ्यश्च नमः । वो नमः ।
नमो रथिभ्यो नमः । अरथेभ्यश्च नमः । वो नमः ।
नमो रथेभ्यो नमः । रथपतिभ्यश्च नमः । वो नमः ।
नमस्सेनाभ्यो नमः । सेनानिभ्यश्च नमः । वो नमः ।
नमः क्षत्तृभ्यो नमः । संग्रहीतृभ्यश्च नमः । वो नमः ।
नमस्तक्षभ्यो नमः । रथकारेभ्यश्च नमः । वो नमः ।
नमः कुलालेभ्यो नमः । कर्मारेभ्यश्च नमः । वो नमः ।
नमः पुंजिष्टेभ्यो नमः । निषादेभ्यश्च नमः । वो नमः ।
नम इषुकृद्भ्यो नमः । धन्वकृद्भ्यश्च नमः । वो नमः ।
नमो मृगयुभ्यो नमः । श्वनिभ्यश्च नमः । वो नमः ।
नमः श्वभ्यो नमः । श्वपतिभ्यश्च नमः । वो नमः

नमो भवाय च नमः । रुद्राय च नमः ।
नमश्शर्वाय च नमः । पशुपतये च नमः ।
नमो नीलग्रीवाय च नमः । शितिकण्ठाय च नमः ।
नमः कपर्दिने च नमः । व्युप्तकेशाय च नमः ।

नम॑स्सहस्रा॒क्षाय॑ च॒ नम॑ः । श॒तध॑न्वने च॒ नम॑ः ।
नमो॑ गिरि॒शाय॑ च॒ नम॑ः । शि॒पि॒वि॒ष्टाय॑ च॒ नम॑ः ।
नमो॑ मी॒ढुष्ट॑माय च॒ नम॑ः । इषु॑मते च॒ नम॑ः ।
नमो᳚ ह्र॒स्वाय॑ च॒ नम॑ः । वा॒म॒नाय॑ च॒ नम॑ः ।
नमो॑ बृह॒ते च॒ नम॑ः । वर्षी॑यसे च॒ नम॑ः ।
नमो॑ वृ॒द्धाय॑ च॒ नम॑ः । सं॒वृध्व॑ने च॒ नम॑ः ।
नमो॒ अग्रि॑याय च॒ नम॑ः । प्र॒थ॒माय॑ च॒ नम॑ः ।
नम॑ आ॒शवे॑ च॒ नम॑ः । अ॒जि॒राय॑ च॒ नम॑ः ।
नम॒ः शीघ्रि॑याय च॒ नम॑ः । शीभ्या॑य च॒ नम॑ः ।
नम॑ ऊ॒र्म्या॑य च॒ नम॑ः । अ॒व॒स्व॒न्या॑य च॒ नम॑ः ।
नम॑ः स्रो॒त॒स्या॑य च॒ नम॑ः । द्वीप्या॑य च॒ नम॑ः ।

नमो᳚ ज्ये॒ष्ठाय॑ च॒ नम॑ः । क॒नि॒ष्ठाय॑ च॒ नम॑ः ।
नम॑ः पूर्व॒जाय॑ च॒ नम॑ः । अ॒प॒र॒जाय॑ च॒ नम॑ः ।
नमो॑ मध्य॒माय॑ च॒ नम॑ः । अ॒प॒ग॒ल्भाय॑ च॒ नम॑ः ।
नमो॑ जघ॒न्या॑य च॒ नम॑ः । बुध्नि॑याय च॒ नम॑ः ।
नम॑ः सो॒भ्या॑य च॒ नम॑ः । प्र॒ति॒स॒र्या॑य च॒ नम॑ः ।
नमो॒ याम्या॑य च॒ नम॑ः । क्षेम्या॑य च॒ नम॑ः ।
नम॑ उर्व॒र्या॑य च॒ नम॑ः । खल्या॑य च॒ नम॑ः ।
नम॒ः श्लोक्या॑य च॒ नम॑ः । अ॒व॒सा॒न्या॑य च॒ नम॑ः ।
नमो॒ वन्या॑य च॒ नम॑ः । कक्ष्या॑य च॒ नम॑ः ।
नम॑ः श्र॒वाय॑ च॒ नम॑ः । प्र॒ति॒श्र॒वाय॑ च॒ नम॑ः ।
नम॑ आ॒शुषे॑णाय च॒ नम॑ः । आ॒शुर॑थाय च॒ नम॑ः ।
नम॒ः शूरा॑य च॒ नम॑ः । अ॒व॒भि॒न्द॒ते च॒ नम॑ः ।
नमो॑ व॒र्मिणे॑ च॒ नम॑ः । व॒रू॒थिने॑ च॒ नम॑ः ।
नमो॑ बि॒ल्मिने॑ च॒ नम॑ः । क॒व॒चिने॑ च॒ नम॑ः ।
नम॑श्श्रु॒ताय॑ च॒ नम॑ः । श्रु॒त॒से॒नाय॑ च॒ नम॑ः ।

नमो॑ दुन्दु॒भ्या॑य च॒ नम॑ः । आ॒ह॒न॒न्या॑य च॒ नम॑ः ।
नमो॑ धृ॒ष्णवे॑ च॒ नम॑ः । प्र॒मृ॒शाय॑ च॒ नम॑ः ।
नमो॑ दू॒ताय॑ च॒ नम॑ः । प्रहि॑ताय च॒ नम॑ः ।
नमो॑ निष॒ङ्गिणे॑ च॒ नम॑ः । इ॒षु॒धि॒मते॑ च॒ नम॑ः ।
नम॑स्ती॒क्ष्णेष॑वे च॒ नम॑ः । आ॒यु॒धिने॑ च॒ नम॑ः ।
नम॑ः स्वायु॒धाय॑ च॒ नम॑ः । सु॒धन्व॑ने च॒ नम॑ः ।
नम॒ः स्रुत्या॑य च॒ नम॑ः । पथ्या॑य च॒ नम॑ः ।
नम॑ः का॒ट्या॑य च॒ नम॑ः । नी॒प्या॑य च॒ नम॑ः ।

नमस्सूद्याय च नमः । सरस्याय च नमः ।
नमो नाद्याय च नमः । वैशन्ताय च नमः ।
नमः कूप्याय च नमः । अवट्याय च नमः ।
नमो वर्ष्याय च नमः । अवर्ष्याय च नमः ।
नमो मेघ्याय च नमः । विद्युत्याय च नमः ।
नम ईध्रियाय च नमः । आतप्याय च नमः ।
नमो वात्याय च नमः । रेष्मियाय च नमः ।
नमो वास्तव्याय च नमः । वास्तुपाय च नमः ।

नमस्सोमाय च नमः । रुद्राय च नमः ।
नमस्ताम्राय च नमः । अरुणाय च नमः ।
नमः शङ्गाय च नमः । पशुपतये च नमः ।
नम उग्राय च नमः । भीमाय च नमः ।
नमो अग्रेवधाय च नमः । दूरेवधाय च नमः ।
नमो हन्त्रे च नमः । हनीयसे च नमः ।
नमो वृक्षेभ्यो नमः । हरिकेशेभ्यो नमः ।
नमस्ताराय नमः । नमश्शंभवे च नमः ।
मयोभवे च नमः । नमश्शंकराय च नमः ।
मयस्कराय च नमः । नमः शिवाय च नमः ।
शिवतराय च नमः । नमस्तीर्थ्याय च नमः ।
कूल्याय च नमः । नमः पार्याय च नमः ।
अवार्याय च नमः । नमः प्रतरणाय च नमः ।
उत्तरणाय च नमः । नम आतार्याय च नमः ।
आलाद्याय च नमः । नमः शष्प्याय च नमः ।
फेन्याय च नमः । नमः सिकत्याय च नमः ।
प्रवाह्याय च नमः ।

नम इरिण्याय च नमः । प्रपथ्याय च नमः ।
नमः कि ँ शिलाय च नमः । क्षयणाय च नमः ।
नमः कपर्दिने च नमः । पुलस्तये च नमः ।
नमो गोष्ठ्याय च नमः । गृह्याय च नमः ।
नमस्तल्प्याय च नमः । गेह्याय च नमः ।
नमः काट्याय च नमः । गह्वरेष्ठाय च नमः ।
नमो हृदय्याय च नमः । निवेष्प्याय च नमः ।
नमः पा ँ सव्याय च नमः । रजस्याय च नमः ।
नमः शुष्क्याय च नमः । हरित्याय च नमः ।

नमो॑ लोप्या॑य च॒ नम॑: । उ॒ल॒प्या॑य च॒ नम॑: ।
नम॑ ऊ॒र्व्या॑य च॒ नम॑: । सू॒र्म्या॑य च॒ नम॑: ।
नम॑: प॒र्ण्या॑य च॒ नम॑: । प॒र्ण॒श॒द्या॑य च॒ नम॑: ।
नमो॑पगु॒रमा॑णाय च॒ नम॑: । अ॒भि॒घ्न॒ते च॒ नम॑: ।
नम॑ आक्खिद॒ते च॒ नम॑: । प्र॒क्खि॒द॒ते च॒ नम॑: । वो॒ नम॑: ।
कि॒रि॒के॒भ्यो नम॑: । दे॒वाना॒ँ॒ हृद॑येभ्यो॒ नम॑: ।
नमो॑ विक्षी॒णके॒भ्यो॒ नम॑: । नमो॑ विचिन्व॒त्के॒भ्यो॒ नम॑: ।
नम॑ आनिर्ह॒ते॒भ्यो॒ नम॑: । नम॑ आमीव॒त्के॒भ्यो॒ नम॑: ।

The Sri Rudra trishati is used to perform archana of Sri Rudra (or Shiva).
It is said that this is the
only namavaLi form of addressing the Lord in all of the Vedas. The Sri Rudra Trishati uses the verses of the Sri Rudram in a different form. It is a part of the mahanyaasam as well. Students of Sri Rudram practice the trishati after mastering the Sri Rudram. The Trishati archana is also done during pradosha worship of Sri Shiva.

---

Encoded with accent and proofread by
Vaidya Sundaram vaidya_narayanan@yahoo.com
and rechecked by Ajit Krishnan ajit@mudgala.com

---

Please send corrections to sanskrit@cheerful.com
Last updated June 22, 2011
http://sanskritdocuments.org